# Gangashtakam by Satyajnananandatirtha

# ગઙ્ગાષ્ટકં સત્યજ્ઞાનાનન્દતીર્થકૃત

## Document Information

Text title : gaNgAShTakam satyajnAnAnandatIrthakRita

File name : gangAShTakamsatya.itx

Category : aShTaka, devii, nadI, devI

Location : doc_devii

Author : Satyajnananandatirtha

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal, Proofread by PSA Easwaran

Latest update : May 21, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

# Gangashtakam by Satyajnananandatirtha

# ગઙ્ગાષ્ટકં સત્યજ્ઞાનાનન્દતીર્થકૃત

શ્રીગણેશાય નમઃ ॥

યદવધિ તવ નીરં પાતકી નૈતિ ગઙ્ગે
	તદવધિ મલજાલૈર્નૈવ મુક્તઃ કલૌ સ્યાત્ ।
તવ જલકણિકાઽલં પાપિનાં પાપશુદ્ધ્યૈ
	પતિતપરમદીનાંસ્ત્વં હિ પાસિ પ્રપન્નાન્ ॥ ૧॥

તવ શિવજલલેશં વાયુનીતં સમેત્ય
	સપદિ નિરયજાલં શૂન્યતામેતિ ગઙ્ગે ।
શમલગિરિસમૂહાઃ પ્રસ્ફુણ્ટતિ પ્રચણ્ડાસ્ત્વયિ
	સખિ વિશતાં નઃ પાપશઙ્કા કુતઃ સ્યાત્ ॥ ૨॥

તવ શિવજલજાલં નિઃસૃતં યર્હિ
	ગઙ્ગે સકલભુવનજાલં પૂતપૂતં તદાઽભૂત્ ।
યમભટકલિવાર્તા દેવિ લુપ્તા યમોઽપિ
	વ્યધિકૃતવરદેહાઃ પૂર્ણકામાઃ સકામાઃ ॥ ૩॥

મધુમધુવનપૂગૈ રત્નપૂગૈર્નૃપૂગૈર્-
	મધુમધુવનપૂગૈર્દેવપૂગૈઃ સપૂગૈઃ ।
પુરહરપરમાઙ્ગે ભાસિ માયેવ ગઙ્ગે શમયસિ
	વિષતાપં દેવદેવસ્ય વન્દ્યમ્ ॥ ૪॥

ચલિતશશિકુલાભૈરુત્તરઙ્ગૈસ્તરઙ્ગૈર્-
	અમિતનદનદીનામઙ્ગસઙ્ગૈરસઙ્ગૈઃ ।
વિહરસિ જગદણ્ડે ખણ્ડંયતી ગિરીન્દ્રાન્ રમયસિ
	નિજકાન્તં સાગરં કાન્તકાતે ॥ ૫॥

તવ પરમહિમાનં ચિત્તવાચામમાનં
	હરિહરવિધિશક્રા નાપિ ગઙ્ગે વિદન્તિ ।

શ્રુતિકુલમભિધત્તે શઙ્કિતં તં ગુણાન્તં
ગુણગણસુવિલાપૈર્નેતિ નેતીતિ સત્યમ્ ॥ ૬॥

તવ નુતિનતિનામાન્યપ્યઘં પાવયન્તિ દદતિ
પરમશાન્તિં દિવ્યભોગાન્ જનાનામ્ ।
ઇતિ પતિતશરણ્યે ત્વાં પ્રપન્નોઽસ્મિ
માતર્લલિતતરતરઙ્ગે ચાઙ્ગ ગવેપ્રસીદ ॥ ૭॥

શુભતરકૃતયોગાદ્વિશ્વનાથ-
પ્રસાદાદ્ભવહરવરવિદ્યાં પ્રાપ્ય કાશ્યાં હિ ગઙ્ગે ।
ભગવતિ તવ તીરે નીરસારં નિપીય
મુદિતહૃદયકઞ્જે નન્દસૂનું ભજેઽહમ્ ॥ ૮॥

ગઙ્ગાષ્ટકમિદં કૃત્વા ભુક્તિમુક્તિપ્રદં નૃણામ્ ।
સત્યજ્ઞાનાનન્દતીર્થયતિના સ્વર્પિતં શિવે ॥ ૯॥

તેન પ્રણાતુ ભગવાન્ શિવો ગઙ્ગાધરો વિભુઃ ।
કરોતુ શઙ્કરઃ કાશ્યાં જનાનાં સતતં શિવમ્ ॥ ૧૦॥

ઇતિ સત્યજ્ઞાનાનન્દતીર્થયતિના વિરચિતં ગઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dinesh Agarwal

*Gangashtakam by Satyajnananandatirtha*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*